# Amantranotsava Stotram

# આમન્ત્રણોત્સવસ્તોત્રમ્

## Document Information

Text title : Amantranotsava Stotram

File name : AmantraNotsavastotram.itx

Category : raama, stotra

Location : doc_raama

Proofread by : Pranav Tendulkar

Description/comments : Mantra Stotra Sangraha

Acknowledge-Permission: Vishwa Madhwa Maha Parishat

Latest update : November 14, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 14, 2021

*sanskritdocuments.org*

# આમન્ત્રણોત્સવસ્તોત્રમ્

આમન્ત્રણં તે નિગમોક્તમન્ત્રૈસ્તન્ત્રપ્રવેશાય મનોહરાય ।
શ્રીરામચન્દ્રાય સુખપ્રદાય કરોમ્યહં ત્વં કૃપયા ગૃહાણ ॥ ૧॥

સત્યાધિરાજાર્ચિતપાદપદ્મ શ્રીમધ્વસમ્પૂજિત સુન્દરાઙ્ગ ।
શ્રીભાર્ગવીસન્નુતમન્દહાસ શ્રીવ્યાસદેવાય નમો નમસ્તે ॥ ૨॥

અનન્તરૂપૈરજિતાદિભિશ્ચ પરાદિભિશ્શ્રીબૃહતીસહસ્રઃ ।
વિશ્વાદિભિશ્ચૈવ સહસ્રરૂપૈર્નારાયણાદ્યષ્ટશતૈરજાદ્યૈઃ ॥ ૩॥

એકાધિપઞ્ચાશદિતૈશ્ચ રૂપૈશ્શ્રીકેશવાદ્યૈશ્ચ ચતુર્સ્સુવિંશૈઃ ।
મત્સ્યાદિભિસ્સ્વચ્છદશસ્વરૂપૈર્વિશ્વાદિભિશ્ચાષ્ટભિરગ્ર્યરૂપૈઃ ॥ ૪॥

તથાઽનિરુદ્ધાદિચતુસ્સ્વરૂપૈર્ગોબ્રાહ્મણશ્રીતુલસીનિવાસૈઃ ।
મન્ત્રેશરૂપૈઃ પરમાણુપૂર્વસંવત્સરાન્તામલકાલરૂપૈઃ ॥ ૫॥

જ્ઞાનાદિનૈદૈસ્સ્થાવરજઙ્ગમસ્થૈરવ્યાકૃતાકાશવિહારરૂપૈઃ ।
નારાયણાખ્યેન તથાઽનિરુદ્ધરૂપેણ સક્ષ્મોદગતેન તુષ્ટૈઃ ॥ ૬॥

પ્રદ્યુમ્નસઙ્કર્ષણનામકાભ્યાં ભોક્તૃસ્થિતાભ્યાં ભુજિશક્તિદાભ્યામ્ ।
શ્રીવાસુદેવેન નભઃસ્થિતેન હ્યભીષ્ટદેનાખિલસદ્ગુણેન ॥ ૭॥

અશ્વાદિસદ્યાનગતેન નિત્યમારૂઢરૂપેણ સુસૌખ્યદેન ।
વિશ્વાદિજાગ્રદ્ધિનિયામકેન સ્વપ્નસ્થપાલેન ચ તૈજસેન ॥ ૮॥

પ્રાજ્ઞેન સૌષુપ્તિકપાલકેન તુર્યેણ મૂર્ધ્નિ સ્થિતિયુક્પરેણ ।
આત્માન્તરાત્મેત્યભિધેન હૃત્સ્થરૂપદ્વયેનાખિલસારભોક્ત્રા ।
હૃત્પદ્મમૂલાગ્રગસર્વગૈશ્ચ રૂપત્રયેણાખિલશક્તિભાજા ।
કૃદ્ધોલ્કરૂપૈર્હૃદયાદિસંસ્થૈઃ પ્રાણાદિગૈરન્નમયાદિગૈશ્ચ ॥ ૧૦॥

ઇલાવૃતાદ્યામલખણ્ડસંસ્થૈઃ પ્લક્ષાદિસદ્દ્વીપસમુદ્રધિષ્ણ્યૈઃ ।
મેરુસ્થકિંસ્તુઘ્નગકાલચક્રગ્રહગ્રહાનુગ્રહિભિશ્ચ લોકૈઃ ॥ ૧૧॥

નારાયણીપૂર્વવધૂરુરૂપૈસ્ત્રિધામભિર્ભારસુરધામભિશ્ચ ।
શ્રીમૂલરામપ્રતિમાદિસંસ્થશ્રીરામચન્દ્રખિલસદ્ગુણાબ્ધે ॥ ૧૨॥

સીતાપતે શ્રીપરમાવતાર માબાદિભિર્ બ્રાહ્મમુખૈશ્ચ દેવૈઃ ।
દિક્પાલકૈસ્સાકમનન્તસૌખ્યસમ્પૂર્ણસદ્ભક્તદયામ્બુરાશે ॥ ૧૩॥

સત્યાધિરાજાર્યહૃદબ્જવાસ શ્રીમધ્વહૃત્પઙ્કજકોશવાસ ।
મદ્બિમ્બરૂપેણ ભવૈક્યશાલી ચામન્ત્રિતસ્ત્વદ્ય નમો નમસ્તે ॥

વરાક્ષતાન્ કાઞ્ચનમુદ્રિકાશ્ચ મન્ત્રેણ હેમ્નશ્ચષકે નિધાય ।
સીતાપતે તે પુરતશ્શ્રુતેસ્તુ પ્રદધ્યુરેવં ભગવત્સ્વરૂપમ્ ॥ ૧૫॥

હિરણ્યરૂપસ્સહિરણ્યસંવૃદગપાન્નપાસ્તેદુહિરણ્યવર્ણઃ ।
હિરણ્યયાત્પરિયોને નિષધ્યા હિરણ્યદાદદત્યન્નમસ્મે ॥ ૧૬॥

વસિષ્યોત્તમવસ્ત્રાણિ ભૂષણૈરપ્યલઙ્કુરુ ।
કુર્વન્નુત્સવમત્યન્તમસ્મદીયં મખં યજ ॥ ૧૭॥

વસિષ્યામિ યેધ્રવસ્ત્રાણ્યૂર્જાપતે સોમનો અધ્વરં યજ ।
મન્ત્રિતોऽસિ દેવેશ પુરાણપુરુષોત્તમ ।
મન્ત્રેશૈર્લોકપાલૈશ્ચ સાર્ધં દેવગણૈઃ શ્રિયા ॥ ૧૮॥

ત્રિકાલપૂજાસુ દયાર્દ્રદૃષ્ટ્યા મયાર્પિતં ચાર્હણમાશુ સત્ત્વમ્ ।
ગૃહાણ લોકાધિપતે રમેશ મમાપરાધાન્ સકલાન્ ક્ષમસ્વ ॥ ૧૯॥

શ્રીમત્સત્યપ્રમોદાર્યહૃન્નિવાસ્યનિલેશિતા ।
સત્યજ્ઞાનાનન્તગુણઃ પ્રીયતાં બાદરાયણઃ ॥ ૨૦॥

ઇતિ આમન્ત્રણોત્સવસ્તોત્રં સમ્પૂર્ણમ્ ।

Proofread by Pranav Tendulkar

*Amantranotsava Stotram*

pdf was typeset on November 14, 2021

Please send corrections to *sanskrit@cheerful.com*